श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे चतुर्थोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे चतुर्थोऽध्यायः ॥

श्रीशुक उवाच
अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं
साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिन -
मेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा
देवताश्चावनितलसमवनायातितरां जगृधुः ॥ **1** ॥

तस्य ह वा इत्थं वर्ष्मणा वरीयसा
बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा
वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ **2** ॥

तस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष
तदवधार्य भगवान् ऋषभदेवो योगेश्वरः
प्रहस्यात्मयोगमायया स्ववर्षमजनाभं
नामाभ्यवर्षत् ॥ **3** ॥

नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्याति -
प्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं
गृहीतनरलोकसधर्मं भगवन्तं पुराणपुरुषं
मायाविलसितमतिर्वत्स तातेति सानुराग -
मुपलालयन् परां निर्वृतिमुपगतः ॥ **4** ॥

विदितानुरागमापौरप्रकृतिजनपदो राजा
नाभिरात्मजं समयसेतुरक्षायामभिषिच्य
ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां
प्रसन्ननिपुणेन तपसा समाधियोगेन
नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः
कालेन तन्महिमानमवाप ॥ 5 ॥

यस्य ह पाण्डवेय श्लोकओने -
को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान्।
अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ 6 ॥

ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मङ्गलपूजिताः।
यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ 7 ॥

अथ ह भगवान् ऋषभदेवः स्ववर्षं कर्मक्षेत्र -
मनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरै -
र्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननु -
शिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्म
समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां
शतं जनयामास ॥ 8 ॥

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण
आसीद्येनेदं वर्षं भारतमिति व्यपदिशन्ति ॥ 9 ॥

तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः
केतुर्भद्रसेन इन्द्रस्पृग्विदर्भः कीकट इति नव
नवतिप्रधानाः ॥ 10 ॥

कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः॥ **11** ॥

इति भागवतधर्मदर्शना नव महाभागवतास्तेषां
सुचरितं भगवन् महिमोपबृंहितं वसुदेवनारद -
संवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः॥ **12** ॥

यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा
महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा
ब्राह्मणा बभूवुः॥ **13** ॥

भगवान् ऋषभसंज्ञ आत्मतन्त्रः स्वयं नित्य -
निवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एव
विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं
धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशान्तो
मैत्रः कारुणिको धर्मार्थयशःप्रजानन्दामृता -
वरोधेन गृहेषु लोकं नियमयत्॥ **14** ॥

यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः॥ **15** ॥

यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं
ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जन -
तामनुशशास॥ **16** ॥

द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद् -
देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं
शतकृत्व इयाज॥ **17** ॥

भगवतर्षभेण परिरक्ष्यमाण एतस्मिन् वर्षे न कश्चन
पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्

कथञ्चन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं
विजृम्भितस्नेहातिशयमन्तरेण ॥ **18** ॥

स कदाचिदटमानो भगवान् ऋषभो ब्रह्मावर्तगतो
ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीना -
मात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रिता -
नप्युपशिक्षयन्निति होवाच ॥ **19** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे चतुर्थोऽध्यायः ॥